# Chanting

ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यङ्करवावहै ।
तेजस्वि नावधीतमस्तु मा विद्विषावहै ।
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ।
ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ गणानां त्वा गणपतिꣳहवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आनःशृण्वन्नूतिभिःस्सीदसादनम् ॥
महागणपतये नमः ॥

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यम्बकाय त्रिपुरान्तकाय
त्रिकालाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय
मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः ॥

ॐ श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम्।

अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम्॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम्।

सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने।

व्योमवद्व्याप्तदेहाय दक्षिणामूर्तये नमः॥

गुकारस्त्वन्धकारश्च रुकारस्तन्निवर्तकः।

अन्धकारनिरोधित्वाद् गुरुरित्यभिधीयते॥

ॐ स्वस्ति प्रजाभ्यः परिपालयन्ताम्। न्यायेन मार्गेण महीं महीशाः॥

गोब्राह्मणेभ्यश्शुभमस्तु नित्यम्। लोकास्समस्तास्सुखिनो भवन्तु॥

काले वर्षतु पर्जन्यः। पृथिवी सस्यशालिनी॥

देशोऽयं क्षोभरहितः। ब्राह्मणास्सन्तु निर्भयाः॥

सर्वे भवन्तु सुखिनः। सर्वे सन्तु निरामयाः॥

सर्वे भद्राणि पश्यन्तु। मा कश्चिद् दुःखभाग् भवेत्॥

असतो मा सद्गमय।

तमसो मा ज्योतिर्गमय।

मृत्योर्मा अमृतं गमय॥

ॐ शान्तिः शान्तिः शान्तिः

ॐ न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः ।

परेण नाकन्निहितङ्गुहायाँव्विभ्राजते यद्यतयो विशन्ति ।

वेदान्तविज्ञानसुनिश्चितार्थास्सन्न्यासयोगाद्यतयश्शुद्धसत्त्वाः ।

ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे ।

दहँव्विपापम्परमेऽश्मभूतँय्यत्पुण्डरीकम्पुरमध्यसꣳस्थम् ।

तत्रापि दहङ्गगनँव्विशोकस्तस्मिन्यदन्तस्तदुपासितव्यम् ।

यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः ।

तस्य प्रकृतिलीनस्य यः परस्स महेश्वरः ॥

न तत्र सूर्यो भाति न चन्द्रतारकं

नेमा विद्युतो भान्ति कुतोऽयमग्निः ।

तमेव भान्तमनुभाति सर्वं

तस्य भासा सर्वमिदँव्विभाति ॥